## ॥ श्री बगलामुखी कवचं ॥
## Shri Baglamukhi Kavach

### ॥ ॐ गण गणपतये नमः ॥

### ॥ अथ ध्यानम् ॥
जिह्वाग्रमादाय करेण देवीं वामेन शत्रून् परिपीडयन्तीम् ।
गदाभि घातेन च दक्षिणेन पीताम्बराढ्यां द्विभुजां नमामि ॥

### ॥ अथ बगलामुखी कवचम् ॥
श्रुत्वा च बगलापूजां स्तोत्रं चापि महेश्वर ।
इदानी श्रोतुमिच्छामि कवचं वद मे प्रभो ॥१ ॥
वैरिनाशकरं दिव्यं सर्वाऽशुभविनाशनम् ।
शुभदं स्मरणात्पुण्यं त्राहि मां दु :खनाशनम् ॥२ ॥

### ॥ श्री भैरव उवाच ॥
कवचं शृणु वक्ष्यामि भैरवीप्राणवल्लभम् ।
पठित्वा धारयित्वा तु त्रैलोक्ये विजयी भवेत् ॥३ ॥

ॐ अस्य श्री बगलामुखीकवचस्य नारद ऋषि : ।
अनुष्टप्छन्द : । बगलामुखी देवता । लं बीजम् ।
ऐं कीलकम् पुरुषार्थचष्टयसिद्धये जपे विनियोग :।

ॐ शिरो मे बगला पातु हृदयैकाक्षरी परा ।
ॐ ह्लीं ॐ मे ललाटे च बगला वैरिनाशिनी ॥१ ॥
गदाहस्ता सदा पातु मुखं मे मोक्षदायिनी ।
वैरिजिह्वाधरा पातु कण्ठं मे वगलामुखी ॥२ ॥

उदरं नाभिदेशं च पातु नित्य परात्परा ।
परात्परतरा पातु मम गुह्यं सुरेश्वरी ॥३ ॥
हस्तौ चैव तथा पादौ पार्वती परिपातु मे ।

विवादे विषमे घोरे संग्रामे रिपुसङ्कटे ॥४ ॥

पीताम्बरधरा पातु सर्वाङ्गी शिवनर्तकी ।
श्रीविद्या समय पातु मातङ्गी पूरिता शिवा ॥५ ॥
पातु पुत्रं सुतांश्चैव कलत्रं कालिका मम ।
पातु नित्य भ्रातरं में पितरं शूलिनी सदा ॥६ ॥

रंध्र हि बगलादेव्या : कवचं मन्मुखोदितम् ।
न वै देयममुख्याय सर्वसिद्धिप्रदायकम् ॥ ७ ॥
पाठनाद्धारणादस्य पूजनाद्वाञ्छतं लभेत् ।
इदं कवचमज्ञात्वा यो जपेद् बगलामुखीम् ॥८ ॥

पिवन्ति शोणितं तस्य योगिन्य : प्राप्य सादरा : ।
वश्ये चाकर्षणो चैव मारणे मोहने तथा ॥९ ॥
महाभये विपत्तौ च पठेद्वा पाठयेत्तु य : ।
तस्य सर्वार्थसिद्धि : स्याद् भक्तियुक्तस्य पार्वति ॥१० ॥

**॥ इति श्री बगलामुखी कवचं सम्पूर्णम् ॥**